# ॥ श्री दाशरथ्यष्टकम् ॥

क्षीरसागरवारिमध्यमहाहिभोगनिवासिनं
नारदादिमुनीन्द्रवन्दितचारुपादसरोरुहम् ।
वारिजामलपत्रलोचनमब्धिजारमणं विभुं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥ १ ॥

पाकशासनवन्दितामलपादयुग्मसरोरुहं
शोकनाशनमीशमीशमशेषदोषविवर्जितम् ।
लोकसम्भवसंहृतिस्थितिहेतुभूतगुणोदयं
नाकवासिजनप्रियं प्रणमामि दाशरथिं सदा ॥ २ ॥

अण्डजाधिपवाहनं शशिमण्डलाभमुखं महा-
दण्डकावनसेवितं वरकुण्डलाङ्गदभूषणम् ।
चण्डविक्रमखण्डितासुरमण्डलं मधुसूदनं
पाण्डवप्रियसारथिं प्रणमामि दाशरथिं सदा ॥ ३ ॥

तर्कनिश्चितचित्तवृत्तिभिरप्रतर्क्यगुणोदयं
शक्रवर्गविदारणं धृतचक्रमक्रमवर्जितम् ।
अर्कमण्डलमध्यवर्तिनमक्षयं पुरुषोत्तमं
शुक्रनेत्रहरं हरिं प्रणमामि दाशरथिं सदा ॥ ४ ॥

बालकेलिमशेषदानवनाशनं प्रणवात्मकं
स्थूलसूक्ष्मतनुं विभुं गुणकारणात्मगुणोदयम् ।
लीलया धृतभूधरं परिपालिताखिलगोकुलं

नीलकुञ्चितमूर्धजं प्रणमामि दाशरथिं सदा ॥ ५ ॥

मन्दराचलधारिणं दशकन्धरादिविनाशनं
नन्दनाङ्गमुमापतेः प्रियमिन्दिरावरमच्युतम् ।
कञ्जजासनसेवितं सुरवृन्दवन्दितविग्रहं
नन्दगोपसुतं हरिं प्रणमामि दाशरथिं सदा ॥ ६ ॥

कंसमुष्टिकदुष्टधेनुकपूतनादिविनाशनं
हंसकेशिनिषूदनं दमघोषसूनुविदारणम् ।
अंसमध्यलसन्महामणिकौस्तुभादिविराजितं
हिंसकासुरभेदकं प्रणमामि दाशरथिं सदा ॥ ७ ॥

गोपिमण्डलमध्यगं सुरवैरिमण्डलदारिणं
पाण्डवप्रियमिन्द्रपूर्वसुरौघवन्द्यपदाम्बुजम् ।
इन्दिरारमणं गुणार्णवमम्बुजाक्षममानुषं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥ ८ ॥

भक्तिपूर्वकमेतदष्टकमिष्टसिद्धिदमादराद्
यस्तु कीर्तयते शृणोत्यखिलापदर्णवतारकम् ।
सर्वदेववरार्चितं नृहरेः पदं परमक्षयं
याति दाशरथेरनुग्रहविग्रहोऽखिलवल्लभः ॥ ९ ॥

॥ इति श्रीत्रिविक्रमपण्डिताचार्यसुत नारायणपण्डिताचार्य विरचितं
श्रीदाशरथ्यष्टकम् ॥